श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ एकसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकसप्ततितमः सर्गः ॥

## अतिकायस्य घोरं युद्धं लक्ष्मणेन तस्य वधश्च

स्वबलं व्यथितं दृष्ट्वा तुमुलं लोमहर्षणम्।
भ्रातॄंश्च निहतान् दृष्ट्वा शक्रतुल्यपराक्रमान्॥ **6.71.1** ॥

पितृव्यौ चापि सन्दृश्य समरे सन्निपातितौ।
युद्धोन्मत्तं च मत्तं च भ्रातरौ राक्षसोत्तमौ॥ **6.71.2** ॥

चुकोप च महातेजा ब्रह्मदत्तवरो युधि।
अतिकायोऽद्रिसङ्काशो देवदानवदर्पहा॥ **6.71.3** ॥

स भास्करसहस्रस्य सङ्घातमिव भास्वरम्।
रथमारुह्य शक्रारिरभिदुद्राव वानरान्॥ **6.71.4** ॥

स विस्फार्य तदा चापं किरीटी मृष्टकुण्डलः।
नाम संश्रावयामास ननाद च महास्वनम्॥ **6.71.5** ॥

तेन सिंहप्रणादेन नामविश्रावणेन च।
ज्याशब्देन च भीमेन त्रासयामास वानरान्॥ **6.71.6** ॥

ते दृष्ट्वा देहमाहात्म्यं कुम्भकर्णोऽयमुत्थितः।
भयार्ता वानराः सर्वे संश्रयन्ते परस्परम्॥ **6.71.7** ॥

ते तस्य रूपमालोक्य यथा विष्णोस्त्रिविक्रमे।
भयाद् वानरयोधास्ते विद्रवन्ति ततस्ततः॥ **6.71.8** ॥

तेऽतिकायं समासाद्य वानरा मूढचेतसः।
शरण्यं शरणं जग्मुर्लक्ष्मणाग्रजमाहवे॥ **6.71.9** ॥

ततोऽतिकायं काकुत्स्थो रथस्थं पर्वतोपमम्।
ददर्श धन्विनं दूराद् गर्जन्तं कालमेघवत्॥ **6.71.10** ॥

स तं दृष्ट्वा महाकायं राघवस्तु सुविस्मितः।
वानरान् सान्त्वयित्वा च विभीषणमुवाच ह॥ **6.71.11** ॥

कोऽसौ पर्वतसङ्काशो धनुष्मान् हरिलोचनः।
युक्ते हयसहस्रेण विशाले स्यन्दने स्थितः॥ **6.71.12** ॥

य एष निशितैः शूलैः सुतीक्ष्णैः प्रासतोमरैः।
अर्चिष्मद्भिर्वृतो भाति भूतैरिव महेश्वरः॥ **6.71.13** ॥

कालजिह्वाप्रकाशाभिर्य एषोऽभिविराजते।
आवृतो रथशक्तीभिर्विद्युद्भिरिव तोयदः॥ **6.71.14** ॥

धनूंषि चास्य सज्जानि हेमपृष्ठानि सर्वशः।
शोभयन्ति रथश्रेष्ठं शक्रचापमिवाम्बरम्॥ **6.71.15** ॥

य एष रक्षःशार्दूलो रणभूमिं विराजयन्।
अभ्येति रथिनां श्रेष्ठो रथेनादित्यवर्चसा॥ **6.71.16** ॥

ध्वजशृङ्गप्रतिष्ठेन राहुणाभिविराजते।
सूर्यरश्मिप्रभैर्बाणैर्दिशो दश विराजयन्॥ **6.71.17** ॥

त्रिनतं मेघनिर्ह्रादं हेमपृष्ठमलङ्कृतम्।
शतक्रतुधनुःप्रख्यं धनुश्चास्य विराजते॥ **6.71.18** ॥

सध्वजः सपताकश्च सानुकर्षो महारथः।
चतुःसादिसमायुक्तो मेघस्तनितनिःस्वनः॥ **6.71.19** ॥

विंशतिर्दश चाष्टौ च तूणास्य रथमास्थिताः।
कार्मुकाणि च भौमानि ज्याश्च काञ्चनपिङ्गलाः॥ **6.71.20** ॥

द्वौ च खड्गौ च पार्श्वस्थौ प्रदीप्तौ पार्श्वशोभितौ।
चतुर्हस्तत्सरुचितौ व्यक्तहस्तदशायतौ॥ **6.71.21** ॥

रक्तकण्ठगुणो धीरो महापर्वतसन्निभः।
कालः कालमहावक्त्रो मेघस्थ इव भास्करः॥ **6.71.22** ॥

काञ्चनाङ्गदनद्धाभ्यां भुजाभ्यामेष शोभते।
शृङ्गाभ्यामिव तुङ्गाभ्यां हिमवान् पर्वतोत्तमः॥ **6.71.23** ॥

कुण्डलाभ्यामुभाभ्यां च भाति वक्त्रं सुभीषणम्।
पुनर्वस्वन्तरगतं परिपूर्णो निशाकरः॥ **6.71.24** ॥

आचक्ष्व मे महाबाहो त्वमेनं राक्षसोत्तमम्।
यं दृष्ट्वा वानराः सर्वे भयार्ता विद्रुता दिशः॥ **6.71.25** ॥

स पृष्टो राजपुत्रेण रामेणामिततेजसा।
आचचक्षे महातेजा राघवाय विभीषणः॥ **6.71.26** ॥

दशग्रीवो महातेजा राजा वैश्रवणानुजः।
भीमकर्मा महात्मा हि रावणो राक्षसेश्वरः॥ **6.71.27** ॥

तस्यासीद् वीर्यवान् पुत्रो रावणप्रतिमो बले।
वृद्धसेवी श्रुतिधरः सर्वास्त्रविदुषां वरः॥ **6.71.28** ॥

अश्वपृष्ठे नागपृष्ठे खड्गे धनुषि कर्षणे।
भेदे सान्त्वे च दाने च नये मन्त्रे च सम्मतः॥ **6.71.29** ॥

यस्य बाहुं समाश्रित्य लङ्का भवति निर्भया।
तनयं धान्यमालिन्या अतिकायमिमं विदुः ॥ **6.71.30** ॥

एतेनाराधितो ब्रह्मा तपसा भावितात्मना।
अस्त्राणि चाप्यवाप्तानि रिपवश्च पराजिताः ॥ **6.71.31** ॥

सुरासुरैरवध्यत्वं दत्तमस्मै स्वयम्भुवा।
एतच्च कवचं दिव्यं रथश्च रविभास्वरः ॥ **6.71.32** ॥

एतेन शतशो देवा दानवाश्च पराजिताः।
रक्षितानि च रक्षांसि यक्षाश्चापि निषूदिताः ॥ **6.71.33** ॥

वज्रं विष्टम्भितं येन बाणैरिन्द्रस्य धीमता।
पाशः सलिलराजस्य युद्धे प्रतिहतस्तथा ॥ **6.71.34** ॥

एषोऽतिकायो बलवान् राक्षसानामथर्षभः।
स रावणसुतो धीमान् देवदानवदर्पहा ॥ **6.71.35** ॥

तदस्मिन् क्रियतां यत्नः क्षिप्रं पुरुषपुङ्गव।
पुरा वानरसैन्यानि क्षयं नयति सायकैः ॥ **6.71.36** ॥

ततोऽतिकायो बलवान् प्रविश्य हरिवाहिनीम्।
विस्फारयामास धनुर्ननाद च पुनः पुनः ॥ **6.71.37** ॥

तं भीमवपुषं दृष्ट्वा रथस्थं रथिनां वरम्।
अभिपेतुर्महात्मानः प्रधाना ये वनौकसः ॥ **6.71.38** ॥

कुमुदो द्विविदो मैन्दो नीलः शरभ एव च।
पादपैर्गिरिशृङ्गैश्च युगपत् समभिद्रवन् ॥ **6.71.39** ॥

तेषां वृक्षांश्च शैलांश्च शरैः कनकभूषणैः।
अतिकायो महातेजाश्चिच्छेदास्त्रविदां वरः ॥ **6.71.40** ॥

तांश्चैव सर्वान् स हरीञ्शरैः सर्वायसैर्बली।
विव्याधाभिमुखान् सङ्ख्ये भीमकायो निशाचरः॥ **6.71.41** ॥

तेऽर्दिता बाणवर्षेण भिन्नगात्राः पराजिताः।
न शेकुरतिकायस्य प्रतिकर्तुं महाहवे॥ **6.71.42** ॥

तत् सैन्यं हरिवीराणां त्रासयामास राक्षसः।
मृगयूथमिव क्रुद्धो हरियौवनदर्पितः॥ **6.71.43** ॥

स राक्षसेन्द्रो हरियूथमध्ये
    नायुध्यमानं निजघान कञ्चित्।
उत्पत्य रामं स धनुःकलापी
    सगर्वितं वाक्यमिदं बभाषे॥ **6.71.44** ॥

रथे स्थितोऽहं शरचापपाणि -
    र्न प्राकृतं कञ्चन योधयामि।
यस्यास्ति शक्तिर्व्यवसाययुक्तो
    ददातु मे शीघ्रमिहाद्य युद्धम्॥ **6.71.45** ॥

तत् तस्य वाक्यं ब्रुवतो निशम्य
    चुकोप सौमित्रिरमित्रहन्ता।
अमृष्यमाणश्च समुत्पपात
    जग्राह चापं च ततः स्मयित्वा॥ **6.71.46** ॥

क्रुद्धः सौमित्रिरुत्पत्य तूणादाक्षिप्य सायकम्।
पुरस्तादतिकायस्य विचकर्ष महद्धनुः॥ **6.71.47** ॥

पूरयन् स महीं सर्वामाकाशं सागरं दिशः।
ज्याशब्दो लक्ष्मणस्योग्रस्त्रासयन् रजनीचरान्॥ **6.71.48** ॥

सौमित्रेश्चापनिर्घोषं श्रुत्वा प्रतिभयं तदा।
विसिस्मिये महातेजा राक्षसेन्द्रात्मजो बली॥ **6.71.49** ॥

तदातिकायः कुपितो दृष्ट्वा लक्ष्मणमुत्थितम्।
आदाय निशितं बाणमिदं वचनमब्रवीत्॥ **6.71.50** ॥

बालस्त्वमसि सौमित्रे विक्रमेष्वविचक्षणः।
गच्छ किं कालसङ्काशं मां योधयितुमिच्छसि॥ **6.71.51** ॥

नहि मद्बाहुसृष्टानां बाणानां हिमवानपि।
सोढुमुत्सहते वेगमन्तरिक्षमथो मही॥ **6.71.52** ॥

सुखप्रसुप्तं कालाग्निं विबोधयितुमिच्छसि।
न्यस्य चापं निवर्तस्व प्राणान्न जहि मद्गतः॥ **6.71.53** ॥

अथवा त्वं प्रतिस्तब्धो न निवर्तितुमिच्छसि।
तिष्ठ प्राणान् परित्यज्य गमिष्यसि यमक्षयम्॥ **6.71.54** ॥

पश्य मे निशितान् बाणान् रिपुदर्पनिषूदनान्।
ईश्वरायुधसङ्काशांस्तप्तकाञ्चनभूषणान्॥ **6.71.55** ॥

एष ते सर्पसङ्काशो बाणः पास्यति शोणितम्।
मृगराज इव क्रुद्धो नागराजस्य शोणितम्।
इत्येवमुक्त्वा सङ्क्रुद्धः शरं धनुषि सन्दधे॥ **6.71.56** ॥

श्रुत्वातिकायस्य वचः सरोषं
सगर्वितं संयति राजपुत्रः।
स सञ्चुकोपातिबलो मनस्वी
उवाच वाक्यं च ततो महार्थम्॥ **6.71.57** ॥

न वाक्यमात्रेण भवान् प्रधानो
　　न कत्थनात् सत्पुरुषा भवन्ति।
मयि स्थिते धन्विनि बाणपाणौ
　　निदर्शयस्वात्मबलं दुरात्मन्॥ **6.71.58** ॥

कर्मणा सूचयात्मानं न विकत्थितुमर्हसि।
पौरुषेण तु यो युक्तः स तु शूर इति स्मृतः॥ **6.71.59** ॥

सर्वायुधसमायुक्तो धन्वी त्वं रथमास्थितः।
शरैर्वा यदि वाप्यस्त्रैर्दर्शयस्व पराक्रमम्॥ **6.71.60** ॥

ततः शिरस्ते निशितैः पातयिष्याम्यहं शरैः।
मारुतः कालसम्पक्वं वृन्तात् तालफलं यथा॥ **6.71.61** ॥

अद्य ते मामका बाणास्तप्तकाञ्चनभूषणाः।
पास्यन्ति रुधिरं गात्राद् बाणशल्यान्तरोत्थितम्॥ **6.71.62** ॥

बालोऽयमिति विज्ञाय न चावज्ञातुमर्हसि।
बालो वा यदि वा वृद्धो मृत्युं जानीहि संयुगे॥ **6.71.63** ॥

बालेन विष्णुना लोकास्त्रयः क्रान्तास्त्रिविक्रमैः।
लक्ष्मणस्य वचः श्रुत्वा हेतुमत् परमार्थवत्।
अतिकायः प्रचुक्रोध बाणं चोत्तममाददे॥ **6.71.64** ॥

ततो विद्याधरा भूता देवा दैत्या महर्षयः।
गुह्यकाश्च महात्मानस्तद् युद्धं द्रष्टुमागमन्॥ **6.71.65** ॥

ततोऽतिकायः कुपितश्चापमारोप्य सायकम्।
लक्ष्मणाय प्रचिक्षेप सङ्क्षिपन्निव चाम्बरम्॥ **6.71.66** ॥

तमापतन्तं निशितं शरमाशीविषोपमम्।
अर्धचन्द्रेण चिच्छेद लक्ष्मणः परवीरहा॥ **6.71.67** ॥

तं निकृत्तं शरं दृष्ट्वा कृत्तभोगमिवोरगम्।
अतिकायो भृशं क्रुद्धः पञ्च बाणान् समादधे॥ **6.71.68** ॥

ताञ्शरान् सम्प्रचिक्षेप लक्ष्मणाय निशाचरः।
तानप्राप्ताञ्शितैर्बाणैश्चिच्छेद भरतानुजः॥ **6.71.69** ॥

स ताञ्छित्त्वा शितैर्बाणैर्लक्ष्मणः परवीरहा।
आददे निशितं बाणं ज्वलन्तमिव तेजसा॥ **6.71.70** ॥

तमादाय धनुःश्रेष्ठे योजयामास लक्ष्मणः।
विचकर्ष च वेगेन विससर्ज च सायकम्॥ **6.71.71** ॥

पूर्णायतविसृष्टेन शरेण नतपर्वणा।
ललाटे राक्षसश्रेष्ठमाजघान स वीर्यवान्॥ **6.71.72** ॥

स ललाटे शरो मग्नस्तस्य भीमस्य रक्षसः।
ददृशे शोणितेनाक्तः पन्नगेन्द्र इवाचले॥ **6.71.73** ॥

राक्षसः प्रचकम्पेऽथ लक्ष्मणेषु प्रपीडितः।
रुद्रबाणहतं घोरं यथा त्रिपुरगोपुरम्॥ **6.71.74** ॥

चिन्तयामास चाश्वास्य विमृश्य च महाबलः।
साधु बाणनिपातेन श्लाघनीयोऽसि मे रिपुः॥ **6.71.75** ॥

विधायैवं विदार्यास्यं नियम्य च महाभुजौ।
स रथोपस्थमास्थाय रथेन प्रचचार ह॥ **6.71.76** ॥

एकं त्रीन् पञ्च सप्तेति सायकान् राक्षसर्षभः।
आददे सन्दधे चापि विचकर्षोत्ससर्ज च॥ **6.71.77** ॥

ते बाणाः कालसङ्काशा राक्षसेन्द्रधनुश्च्युताः।
हेमपुङ्खा रविप्रख्याश्चक्रुर्दीप्तमिवाम्बरम्॥ **6.71.78** ॥

ततस्तान् राक्षसोत्सृष्टाञ्शरौघान् राघवानुजः।
असम्भ्रान्तः प्रचिच्छेद निशितैर्बहुभिः शरैः॥ **6.71.79** ॥

ताञ्शरान् युधि सम्प्रेक्ष्य निकृत्तान् रावणात्मजः।
चुकोप त्रिदशेन्द्रारिर्जग्राह निशितं शरम्॥ **6.71.80** ॥

स सन्धाय महातेजास्तं बाणं सहसोत्सृजत्।
तेन सौमित्रिमायान्तमाजघान स्तनान्तरे॥ **6.71.81** ॥

अतिकायेन सौमित्रिस्ताडितो युधि वक्षसि।
सुस्राव रुधिरं तीव्रं मदं मत्त इव द्विपः॥ **6.71.82** ॥

स चकार तदात्मानं विशल्यं सहसा विभुः।
जग्राह च शरं तीक्ष्णमस्त्रेणापि समाददे॥ **6.71.83** ॥

आग्नेयेन तदास्त्रेण योजयामास सायकम्।
स जज्वाल तदा बाणो धनुष्यस्य महात्मनः॥ **6.71.84** ॥

अतिकायोऽतितेजस्वी रौद्रमस्त्रं समाददे।
तेन बाणं भुजङ्गाभं हेमपुङ्खमयोजयत्॥ **6.71.85** ॥

तदस्त्रं ज्वलितं घोरं लक्ष्मणः शरमाहितम्।
अतिकायाय चिक्षेप कालदण्डमिवान्तकः॥ **6.71.86** ॥

आग्नेयास्त्राभिसंयुक्तं दृष्ट्वा बाणं निशाचरः।
उत्ससर्ज तदा बाणं रौद्रं सूर्यास्त्रयोजितम्॥ **6.71.87** ॥

तावुभावम्बरे बाणावन्योन्यमभिजघ्नतुः।
तेजसा सम्प्रदीप्ताग्रौ क्रुद्धाविव भुजङ्गमौ॥ **6.71.88** ॥

तावन्योन्यं विनिर्दह्य पेततुः पृथिवीतले ॥ **6.71.89** ॥

निरर्चिषौ भस्मकृतौ न भ्राजेते शरोत्तमौ।
तावुभौ दीप्यमानौ स्म न भ्राजेते महीतले ॥ **6.71.90** ॥

ततोऽतिकायः सङ्क्रुद्धस्त्वाष्ट्रमैषीकमुत्सृजत्।
ततश्चिच्छेद सौमित्रिरस्त्रमैन्द्रेण वीर्यवान् ॥ **6.71.91** ॥

ऐषीकं निहतं दृष्ट्वा कुमारो रावणात्मजः।
याम्येनास्त्रेण सङ्क्रुद्धो योजयामास सायकम् ॥ **6.71.92** ॥

ततस्तदस्त्रं चिक्षेप लक्ष्मणाय निशाचरः।
वायव्येन तदस्त्रेण निजघान स लक्ष्मणः ॥ **6.71.93** ॥

अथैनं शरधाराभिर्धाराभिरिव तोयदः।
अभ्यवर्षत सङ्क्रुद्धो लक्ष्मणो रावणात्मजम् ॥ **6.71.94** ॥

तेऽतिकायं समासाद्य कवचे वज्रभूषिते।
भग्नाग्रशल्याः सहसा पेतुर्बाणा महीतले ॥ **6.71.95** ॥

तान्मोघानभिसम्प्रेक्ष्य लक्ष्मणः परवीरहा।
अभ्यवर्षत बाणानां सहस्रेण महायशाः ॥ **6.71.96** ॥

स वृष्यमाणो बाणौघैरतिकायो महाबलः।
अवध्यकवचः सङ्ख्ये राक्षसो नैव विव्यथे ॥ **6.71.97** ॥

शरं चाशीविषाकारं लक्ष्मणाय व्यपासृजत्।
स तेन विद्धः सौमित्रिर्मर्मदेशे शरेण ह ॥ **6.71.98** ॥

मुहूर्तमात्रं निःसंज्ञो ह्यभवच्छत्रुतापनः।
ततः संज्ञामुपालभ्य चतुर्भिः सायकोत्तमैः ॥ **6.71.99** ॥

निजघान हयान् सङ्ख्ये सारथिं च महाबलः।
ध्वजस्योन्मथनं कृत्वा शरवर्षैररिन्दमः॥ **6.71.100** ॥

असम्भ्रान्तः स सौमित्रिस्ताञ्शरानभिलक्षितान्।
मुमोच लक्ष्मणो बाणान् वधार्थं तस्य रक्षसः॥ **6.71.101** ॥

न शशाक रुजं कर्तुं युधि तस्य नरोत्तमः।
अथैनमभ्युपागम्य वायुर्वाक्यमुवाच ह॥ **6.71.102** ॥

ब्रह्मदत्तवरो ह्येष अवध्यकवचावृतः।
ब्राह्मणास्त्रेण भिन्ध्येनमेष वध्यो हि नान्यथा।
अवध्य एष ह्यन्येषामस्त्राणां कवची बली॥ **6.71.103** ॥

ततस्तु वायोर्वचनं निशम्य
सौमित्रिरिन्द्रप्रतिमानवीर्यः।
समादधे बाणमथोग्रवेगं
तद्ब्राह्ममस्त्रं सहसा नियुज्य॥ **6.71.104** ॥

तस्मिन् वरास्त्रे तु नियुज्यमाने
सौमित्रिणा बाणवरे शिताग्रे।
दिशश्च चन्द्रार्कमहाग्रहाश्च
नभश्च तत्रास ररास चोर्वी॥ **6.71.105** ॥

तं ब्रह्मणोऽस्त्रेण नियुज्य चापे
शरं सपुङ्खं यमदूतकल्पम्।
सौमित्रिरिन्द्रारिसुतस्य तस्य
ससर्ज बाणं युधि वज्रकल्पम्॥ **6.71.106** ॥

तं लक्ष्मणोत्सृष्टविवृद्धवेगं
समापतन्तं श्वसनोग्रवेगम्।

सुपर्णवज्रोत्तमचित्रपुङ्खं
    तदातिकायः समरे ददर्श ॥ **6.71.107** ॥

तं प्रेक्षमाणः सहसातिकायो
    जघान बाणैर्निशितैरनेकैः।
स सायकस्तस्य सुपर्णवेग -
    स्तथातिवेगेन जगाम पार्श्वम् ॥ **6.71.108** ॥

तमागतं प्रेक्ष्य तदातिकायो
    बाणं प्रदीप्तान्तककालकल्पम्।
जघान शक्त्यृष्टिगदाकुठारैः
    शूलैः शरैश्चाप्यविपन्नचेष्टः ॥ **6.71.109** ॥

तान्यायुधान्यद्भुतविग्रहाणि
    मोघानि कृत्वा स शरोऽग्निदीप्तः।
प्रगृह्य तस्यैव किरीटजुष्टं
    तदातिकायस्य शिरो जहार ॥ **6.71.110** ॥

तच्छिरः सशिरस्त्राणं लक्ष्मणेषुप्रमर्दितम्।
पपात सहसा भूमौ शृङ्गं हिमवतो यथा ॥ **6.71.111** ॥

तं भूमौ पतितं दृष्ट्वा विक्षिप्ताम्बरभूषणम्।
बभूवुर्व्यथिताः सर्वे हतशेषा निशाचराः ॥ **6.71.112** ॥

ते विषण्णमुखा दीनाः प्रहारजनितश्रमाः।
विनेदुरुच्चैर्बहवः सहसा विस्वरैः स्वरैः ॥ **6.71.113** ॥

ततस्तत्परितं याता निरपेक्षा निशाचराः।
पुरीमभिमुखा भीता द्रवन्तो नायके हते ॥ **6.71.114** ॥

प्रहर्षयुक्ता बहवस्तु वानराः
प्रफुल्लपद्मप्रतिमाननास्तदा।
अपूजयन् लक्ष्मणमिष्टभागिनं
हते रिपौ भीमबले दुरासदे॥ **6.71.115**॥

अतिबलमतिकायमभ्रकल्पं
युधि विनिपात्य स लक्ष्मणः प्रहृष्टः।
त्वरितमथ तदा स रामपार्श्वं
कपिनिवहैश्च सुपूजितो जगाम॥ **6.71.116**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकसप्ततितमः सर्गः॥